श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चदशः सर्गः ॥

## माणिभद्रकुबेरयोः पराजयो रावणेन पुष्पकस्यापहरणं च

ततस्तान् लक्ष्य वित्रस्तान् यक्षेन्द्रांश्च सहस्रशः।
धनाध्यक्षो महायक्षं माणिभद्रमथाब्रवीत्॥ **7.15.1** ॥

रावणं जहि यक्षेन्द्र दुर्वृत्तं पापचेतसम्।
शरणं भव वीराणां यक्षाणां युद्धशालिनाम्॥ **7.15.2** ॥

एवमुक्तो महाबाहुर्माणिभद्रः सुदुर्जयः।
वृतो यक्षसहस्रैस्तु चतुर्भिः समयोधयत्॥ **7.15.3** ॥

ते गदामुसलप्रासैः शक्तितोमरमुद्गरैः।
अभिघ्नन्तस्तदा यक्षा राक्षसान् समुपाद्रवन्॥ **7.15.4** ॥

कुर्वन्तस्तुमुलं युद्धं चरन्तः श्येनवल्लघु।
बाढं प्रयच्छ नेच्छामि दीयतामिति भाषिणः॥ **7.15.5** ॥

ततो देवाः सगन्धर्वा ऋषयो ब्रह्मवादिनः।
दृष्ट्वा तत् तुमुलं युद्धं परं विस्मयमागमन्॥ **7.15.6** ॥

यक्षाणां तु प्रहस्तेन सहस्रं निहतं रणे।
महोदरेण चानिन्द्यं सहस्रमपरं हतम्॥ **7.15.7** ॥

क्रुद्धेन च तदा राजन् मारीचेन युयुत्सुना।
निमेषान्तरमात्रेण द्वे सहस्रे निपातिते॥ **7.15.8** ॥

क्व च यक्षार्जवं युद्धं क्व च मायाबलाश्रयम्।
रक्षसां पुरुषव्याघ्र तेन तेऽभ्यधिका युधि॥ **7.15.9** ॥

धूम्राक्षेण समागम्य माणिभद्रो महारणे।
मुसलेनोरसि क्रोधात् ताडितो न च कम्पितः॥ **7.15.10** ॥

ततो गदां समाविध्य माणिभद्रेण राक्षसः।
धूम्राक्षस्ताडितो मूर्ध्नि विह्वलः स पपात ह॥ **7.15.11** ॥

धूम्राक्षं ताडितं दृष्ट्वा पतितं शोणितोक्षितम्।
अभ्यधावत सङ्ग्रामे माणिभद्रं दशाननः॥ **7.15.12** ॥

सङ्क्रुद्धमभिधावन्तं माणिभद्रो दशाननम्।
शक्तिभिस्ताडयामास तिसृभिर्यक्षपुङ्गवः॥ **7.15.13** ॥

ताडितो माणिभद्रस्य मुकुटे प्राहरद् रणे।
तस्य तेन प्रहारेण मुकुटं पार्श्वमागतम्॥ **7.15.14** ॥

ततःप्रभृति यक्षोऽसौ पार्श्वमौलिरभूत् किल।
तस्मिंस्तु विमुखीभूते माणिभद्रे महात्मनि।
सन्नादः सुमहान् राजंस्तस्मिन् शैले व्यवर्धत॥ **7.15.15** ॥

ततो दूरात् प्रददृशे धनाध्यक्षो गदाधरः।
शुक्रप्रौष्ठपदाभ्यां च पद्मशङ्खसमावृतः॥ **7.15.16** ॥

स दृष्ट्वा भ्रातरं सङ्ख्ये शापाद् विभ्रष्टगौरवम्।
उवाच वचनं धीमान् युक्तं पैतामहे कुले॥ **7.15.17** ॥

यन्मया वार्यमाणस्त्वं नावगच्छसि दुर्मते।
पश्चादस्य फलं प्राप्य ज्ञास्यसे निरयं गतः ॥ **7.15.18** ॥

यो हि मोहाद् विषं पीत्वा नावगच्छति दुर्मतिः।
स तस्य परिणामान्ते जानीते कर्मणः फलम् ॥ **7.15.19** ॥

दैवतानि न नन्दन्ति धर्मयुक्तेन केनचित्।
येन त्वमीदृशं भावं नीतस्तच्च न बुद्ध्यसे ॥ **7.15.20** ॥

मातरं पितरं विप्रमाचार्यं चावमन्यते।
स पश्यति फलं तस्य प्रेतराजवशं गतः ॥ **7.15.21** ॥

अध्रुवे हि शरीरे यो न करोति तपोऽर्जनम्।
स पश्चात् तप्यते मूढो मृतो गत्वाऽऽत्मनो गतिम् ॥ **7.15.22** ॥

धर्माद् राज्यं धनं सौख्यमधर्माद् दुःखमेव च।
तस्माद् धर्मं सुखार्थाय कुर्यात् पापं विसर्जयेत् ॥ **7.15.23** ॥

पापस्य हि फलं दुःखं तद् भोक्तव्यमिहात्मना।
तस्मादात्मापघातार्थं मूढः पापं करिष्यति ॥ **7.15.24** ॥

कस्यचिन्न हि दुर्बुद्धेश्छन्दतो जायते मतिः।
यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥ **7.15.25** ॥

ऋद्धिं रूपं बलं पुत्रान् वित्तं शूरत्वमेव च।
प्राप्नुवन्ति नरा लोके निर्जितं पुण्यकर्मभिः ॥ **7.15.26** ॥

एवं निरयगामी त्वं यस्य ते मतिरीदृशी।
न त्वां समभिभाषिष्येऽसद्वृत्तेष्वेव निर्णयः ॥ **7.15.27** ॥

एवमुक्तास्ततस्तेन तस्यामात्याः समाहताः।
मारीचप्रमुखाः सर्वे विमुखा विप्रदुद्रुवुः ॥ **7.15.28** ॥

ततस्तेन दशग्रीवो यक्षेन्द्रेण महात्मना।
गदयाभिहतो मूर्ध्नि न च स्थानात् प्रकम्पितः॥ **7.15.29** ॥

ततस्तौ राम निघ्नन्तौ तदान्योन्यं महामृधे।
न विह्वलौ न च श्रान्तौ तावुभौ यक्षराक्षसौ॥ **7.15.30** ॥

आग्नेयमस्त्रं तस्मै स मुमोच धनदस्तदा।
राक्षसेन्द्रो वारुणेन तदस्त्रं प्रत्यवारयत्॥ **7.15.31** ॥

ततो मायां प्रविष्टोऽसौ राक्षसीं राक्षसेश्वरः।
रूपाणां शतसाहस्रं विनाशाय चकार च॥ **7.15.32** ॥

व्याघ्रो वराहो जीमूतः पर्वतः सागरो द्रुमः।
यक्षो दैत्यस्वरूपी च सोऽदृश्यत दशाननः॥ **7.15.33** ॥

बहूनि च करोति स्म दृश्यन्ते न त्वसौ ततः।
प्रतिगृह्य ततो राम महदस्त्रं दशाननः॥ **7.15.34** ॥

जघान मूर्ध्नि धनदं व्याविद्ध्य महतीं गदाम्।
एवं स तेनाभिहतो विह्वलः शोणितोक्षितः॥ **7.15.35** ॥

कृत्तमूल इवाशोको निपपात धनाधिपः।
ततः पद्मादिभिस्तत्र निधिभिः स तदा वृतः॥ **7.15.36** ॥

धनदोच्छ्वासितस्तैस्तु वनमानीय नन्दनम्।
निर्जित्य राक्षसेन्द्रस्तं धनदं हृष्टमानसः॥ **7.15.37** ॥

पुष्पकं तस्य जग्राह विमानं जयलक्षणम्।
काञ्चनस्तम्भसंवीतं वैदूर्यमणितोरणम्॥ **7.15.38** ॥

मुक्ताजालप्रतिच्छन्नं सर्वकालफलद्रुमम्।
मनोजवं कामगमं कामरूपं विहङ्गमम्॥ **7.15.39** ॥

मणिकाञ्चनसोपानं तप्तकाञ्चनवेदिकम्।
देवोपवाह्यमक्षय्यं सदा दृष्टिमनःसुखम्॥ **7.15.40**॥

बह्वाश्चर्यं भक्तिचित्रं ब्रह्मणा परिनिर्मितम्।
निर्मितं सर्वकामैस्तु मनोहरमनुत्तमम्॥ **7.15.41**॥

न तु शीतं न चोष्णं च सर्वर्तुसुखदं शुभम्।
स तं राजा समारुह्य कामगं वीर्यनिर्जितम्॥ **7.15.42**॥

जितं त्रिभुवनं मेने दर्पोत्सेकात् सुदुर्मतिः।
जित्वा वैश्रवणं देवं कैलासात् समवातरत्॥ **7.15.43**॥

स तेजसा विपुलमवाप्य तं जयं
    प्रतापवान् विमलकिरीटहारवान्।
रराज वै परमविमानमास्थितो
    निशाचरः सदसि गतो यथानलः॥ **7.15.44**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चदशः सर्गः॥